# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा नवम्बर्-दिसम्बर् - २०१६

| | | |
|---|---|---|
| कक्षा - शास्त्रीप्रथमवर्षम् (SEM-I) | **प्रश्नपत्रम्- ६** | गुणाः - ७० |
| विषयः - नव्यव्याकरणम् | **कोड -** CC-1.1.2 | समयः - ३:०० तः ६:०० |
| दिनाङ्कः- १०.१२.२०१६ | ग्रन्थः- वैयाकरणसिद्धान्तकौमुदी (भ्वादि-अदादि-प्रकरणे) | |

---

प्रथमान्वितिः (युनिट- १)

प्रश्नः १ निम्नलिखितेषु सूत्रेषु द्वयोः सूत्रयोः सोदाहरणं व्याख्या कार्या- (८)

क. तॄफलभजत्रपश्च

ख. आयादय आर्धधातुके वा॥

ग. तीषसहलुभरुषरिषः।

प्रश्नः २ निम्नलिखितेषु चतुर्णांप्रयोगाणां ससूत्रं सिद्धिः कार्या- (८)

तेपिता, ग्लेपते, त्रपिषीष्ट, जजम्भे, घोणते, अक्षमिष्ट, शुशोण, आचामति।

प्रश्नः ३ निम्नलिखितेषु सूत्रद्वयोरुपरि टिप्पणी लेख्या- (४)

क. गुपूधूपविच्छिपणिपनिभ्य आयः

ख. अतो लोपः।

ग. अक्षोऽन्यतरस्याम्।

घ. मिदेर्गुणः।

प्रश्नः ४ निम्नलिखितेषु प्रश्नेषु पञ्चनां प्रश्नानां लघूत्तरंलेख्यम्- (५)

क. 'तिप्सीष्ट' इत्यत्र गुणः कथं नभवति?

ख. **"सनाद्यन्ता धातवः"** इति सूत्रेण का संज्ञा क्रियते?

घ. **"म्वोश्च"** इति सूत्रेण मकारस्य स्थाने क आदेशो भवति?

ङ. **"णेरनिटि"** इति सूत्रेण कस्य लोपो भवति?

च. **"चिणो लुक्"** इति सूत्रेण कस्य लुक् भवति?

छ. **"व्यथो लिटि"** इति सूत्रेण कस्य सम्प्रसारणं भवति?

द्वितीयान्वितिः (युनिट- २)

प्रश्नः ५ निम्नलिखितेषु सूत्रेषु द्वयोः सूत्रयोः सोदाहरणं व्याख्या कार्या- (८)

क. लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये॥

ख. रिङ् शयग्लिङ्क्षु।

ग. लिट्यभ्यासस्योभयेषाम्।

प्रश्नः ६ निम्नलिखितेषु प्रयोगत्रयं ससूत्रं साध्यम्- (८)

अशिश्रियत्, भरिष्यति, धयति, श्यायते, जहदे, गमिष्यति।

प्रश्नः ७ निम्नलिखितेषु सूत्रद्वयोरुपरि टिप्पणी लेख्या- (४)

क. ह्रस्वादङ्गात्।

ख. आतो लोप इटि च।

ग. इषुगमियमां छः।

घ. शासिवसिघसीनां च।

प्रश्नः ८ निम्नलिखितेषु प्रश्नेषु पञ्चनां प्रश्नानां लघूत्तरंलेख्यम्- (५)

क. **"आत औ णलः"** इति सूत्रेण क आदेशो भवति?

ख. **"विभाषा धेट्श्व्योः"** इति सूत्रेण कस्य स्थाने 'चङ्' आदेशो भवति?

ग. 'पिबति' इत्यत्र कस्य धातोः स्थाने 'पिब' आदेशो भवति?

घ. भ्वादि-धातुभ्यः किं विकरणम् क्रियते?

ङ. **"हुश्नुवोः सार्वधातुके"** सूत्रेण किं कार्यं क्रियते?

च. 'सिच्' कस्मिन् लकारे भवति?

छ. **"सृजिदृशोर्झल्यमकिति"** सूत्रेण क आगमः क्रियते?

तृतीयान्वितिः (युनिट - ३)

प्रश्नः ९ निम्नलिखितेषु सूत्रेषु द्वयोः सूत्रयोः सोदाहरणं व्याख्या कार्या- (८)

क. लिट्यन्यतरस्याम्।

ख. लुङ्सनोर्घस्लृ।

ग. उतो वृद्धिर्लुकि हलि।

प्रश्नः १० निम्नलिखितेषु प्रयोगत्रयं ससूत्रं साध्यम्- (८)

अत्ति, अत्स्यति, जघान, अधीते, वेद, एधि, मार्ष्टि।

प्रश्नः ११ निम्नलिखितयोः सूत्रमेकमाश्रित्य टिप्पणी लेख्या- (२)

क. अदः सर्वेषाम्।

ख. इणो गा लुङि।

प्रश्नः १२ निम्नलिखितेषु प्रश्नद्वयस्य उत्तरं देयम्- (२)

क. **"अभ्यासाच्च"** इति सूत्रेण हन्तेर्हकारस्य स्थाने किं भवति?

ख. **"हुझल्भ्यो हेर्धिः"** इति सूत्रेण कस्य स्थाने 'धि' आदेशो भवति?

ग. 'बभूव' इत्यत्र केन सूत्रेण 'अस्' धातोः स्थाने 'भू' आदेशो भवति?

घ. 'शिष्टः' इत्यत्र केन सूत्रेण इत्वं क्रियते?

***